# शान्ति मन्त्रम्

आपो हिष्ठा मयोभुवः । ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उषतीरिव मातरः । तस्मा अरंगमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।

पृथिवी शान्ता साग्निना शान्ता सामे शान्ता शुचगं शमयतु । अन्तरिक्षगं शान्तं तद्वायुना शान्तं तन्मे शान्तगं शुचगं शमयतु । द्यौश्शान्ता सादित्येन शान्ता सा मे शान्ता शुचगं शमयतु ।

पृथिवी शान्तिरन्तरिक्षगं शान्तिर्-द्यौ-श्शान्तिर्-दिश-श्शान्ति-रवान्तरदिशा-श्शान्ति रग्नि-श्शान्तिर्-वायु-श्शान्ति-रादित्य-श्शान्ति-श्चन्द्रमा-श्शान्तिर्-नक्षत्राणि-श्शान्ति रापश्शान्ति-रोषधय-श्शान्तिर्-वनस्पतय-श्शान्तिर्-गौ-श्शान्ति-रजा-शान्ति-रश्व-श्शान्तिः पुरुष-श्शान्ति-ब्रह्म-शान्तिर्-ब्राहमण-श्शान्ति-शान्ति-रेव शान्ति-शान्ति-र्मे अस्तु शान्तिः ।

तयाहगं शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः ॥

एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मोत्तिष्ठन्त-मनूत्तिष्ठन्तु मा माग् श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः ।

उदायुषा स्वायुषोदोषदीनागं रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृतागं अनु । तच्चक्षुर्-देवहितं पुरस्ताच्चुक्रमुच्चरत् ।

पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतगं शृणवाम शरदश्शतं पब्रवाम शरदश्शतमजीतास्याम शरदश्शतं जोक्च सूर्यं दृषे ।

य उदगान्महतोऽर्णवाद्-विभ्राजमानस्सरिरस्य मध्याथ्समा वृषभो लोहिताक्षसूर्यो विपश्चिन्मनसा पुनातु ॥

ब्रहमणश्चोतन्यसि ब्रहमण आणीस्थो ब्राहमण आवपनमसि धारितेयं पृथिवी ब्रहमणा मही दारितमेनेन महदन्तरिक्षं दिवं दाधार पृथिवीगं सदेवां यदहं वेद तदहं धारयाणि मामद्वेदोऽथि विस्रसत् ।

मेधामनीषे माविशतागं समीची भूतस्य भव्यस्यावरुध्यै सर्वमायुरयाणि सर्वमायुरयाणि ।

आभिर्-गीर्भि र्यदतोन ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम । ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सं त्वा॑ सिञ्चामि॒ यजु॑षा प्र॒जामायु॒र्धनं॑ च ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ शं नो॑ मि॒त्रः शं वरु॑णः । शं नो॑ भवत्वर्य॒मा । शं न॒ इन्द्रो॒ बृह॒स्पतिः॑ । शं नो॒ विष्णु॑रुरुक्र॒मः । नमो॒ ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि । त्वामे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि । ऋ॒तं व॑दिष्यामि । स॒त्यं व॑दिष्यामि । तन्माम॑वतु । तद्व॒क्तार॑मवतु । अव॑तु माम् । अव॑तु व॒क्तारम्᳚ ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ तच्छं॒ योरावृ॑णीमहे । गा॒तुं य॒ज्ञाय॑ । गा॒तुं य॒ज्ञप॑तये । दैवी᳚ स्व॒स्तिर॑स्तु नः । स्व॒स्तिर्-मानु॑षेभ्यः । ऊ॒र्ध्वं जि॑गातु भे॑ष॒जम् । शं नो॑ अस्तु द्वि॒पदे᳚ । शं चतु॒ष्पदे ।

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

Web Url: http://www.vignanam.org/veda/shanti-mantram-devanagari.html